ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रिः॒ ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

# पद पाठः (वाक्य सहित)

# तृतीयकाण्डे प्रथमः प्रश्नः

**Notes:**

- **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
- **Please download our vedic compilations from our web site "www.vedavms.in"**

**Version 1.0** **Ocober 31, 2020**

## Version Notes:

**This is now the current Version 1.0 dated October 31, 2020.**

1. This replaces the earlier version 0.0 dated July 31, 2019.

2. This version has been updated with the errors found and reported till Oct 15, 2020.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 31st January 2019 |
| 2nd | Version Number | 0.0 dated 31st July 2019 |

Table of Contents

**3 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायं पद पाठे तृतीयं काण्डं 4**

**3.1 तृतीयकाण्डे प्रथमः प्रश्नः – न्यूनकर्माभिधानं ................ 4**

**ओं नमः परमात्मने, श्री महागणपतये नमः, श्री गुरुभ्यो नमः**

**हरिः ओं**

# 3 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायं पद पाठे तृतीयं काण्डं

## 3.1 तृतीयकाण्डे प्रथमः प्रश्नः – न्यूनकर्माभिधानं

**TS 3.1.1.1**

प्रजापतिरकामयत प्रजाः सृजेयेति स तपोऽतप्यत स सर्पानसृजत
सोऽकामयत प्रजाः सृजेयेति सद्द्वितीयमतप्यत स वयाꣳस्यसृजत
सोऽकामयत प्रजाः सृजेयेति स तृतीयमतप्यत स एतं दीक्षितवाद–
मपश्यत् तमवदत् ततो वै स प्रजा असृजत यत् तपस्तप्त्वा
दीक्षितवादँवदति प्रजा एव तद्यजमानः – [ ] **1**

**TS 3.1.1.1 (Padam)**

प्रजापतिरिति प्रजा – पतिः । अकामयत । प्रजा इति प्र – जाः ।
सृजेय । इति । सः । तपः । अतप्यत । सः । सर्पान् । असृजत ।
सः । अकामयत । प्रजा इति प्र – जाः । सृजेय । इति । सः ।

द्वितीयम् । अतप्यत । सः । वयाऽसि । असृजत । सः ।
अकामयत । प्रजा इति प्र–जाः । सृजेय । इति । सः । तृतीयम् ।
अतप्यत । सः । एतम् । दीक्षितवादमिति दीक्षित – वादम् ।
अपश्यत् । तम् । अवदत् । ततः । वै । सः । प्रजा इति प्र–जाः ।
असृजत । यत् । तपः । तप्त्वा । दीक्षितवादमिति दीक्षित – वादम् ।
वदति । प्रजा इति प्र – जाः । एव । तत् । यजमानः । **1 (50)**

**<u>TS 3.1.1.2</u>**

सृजते यद्वै दीक्षितोऽमेद्ध्यं पश्यत्यपास्माद्दीक्षाक्रामति नीलमस्य
हरो व्येत्यबद्धं मनो दरिद्रं चक्षुः सूर्यो ज्योतिषाᳪश्रेष्ठो दीक्षे मा
माहासीरित्याह नास्माद्दीक्षाऽप क्रामति नास्य नीलं न हरो व्येति यद्वै
दीक्षितमभिवर्.षतिदिव्या आपोऽशान्ता ओजो बलं दीक्षां – [ ] **2**

**<u>TS 3.1.1.2 (Padam)</u>**

सृजते । यत् । वै । दीक्षितः । अमेद्ध्यम् । पश्यति । अपेति ।
अस्मात् । दीक्षा । क्रामति । नीलम् । अस्य । हरः । वीति । एति ।
अबद्धम् । मनः । दरिद्रम् । चक्षुः । सूर्यः । ज्योतिषाम् । श्रेष्ठः ।
दीक्षे । मा । मा । हासीः । इति । आह । न । अस्मात् । दीक्षा ।

अपेति । क्रामति । न । अस्य । नीलम् । न । हरः । वीति ।

एति । यत् । वै । दीक्षितम् । अभिवर्.षतीत्यभि–वर्.षति । दिव्याः ।

आपः । अशान्ताः । ओजः । बलम् । दीक्षाम् । **2 (50)**

**TS 3.1.1.3**

तपोऽस्यनिर्घ्नन्त्युन्दतीर् बलं धत्तौजो धत्त बलं धत्त मा मे दीक्षां

मा तपोनिर्वधिष्टेत्याहै तदेव सर्वमात्मन् धत्ते नास्यौजो बलं न दीक्षां

न तपोनिर्घ्नन्त्यग्निर्वै दीक्षितस्य देवता सोऽस्मादेतर्.हितिर इव

यर्.हि याति तमीश्वरꣳ रक्षाꣳसि हन्तो –[ ] **3**

**TS 3.1.1.3 (Padam)**

तपः । अस्य । निरिति । घ्नन्ति । उन्दतीः । बलम् । धत्त । ओजः ।

धत्त । बलम् । धत्त । मा । मे । दीक्षाम् । मा । तपः । निरिति ।

वधिष्ट । इति । आह । एतत् । एव । सर्वम् । आत्मन्न् । धत्ते । न ।

अस्य । ओजः । बलम् । न । दीक्षाम् । न । तपः । निरिति ।

घ्नन्ति । अग्निः । वै । दीक्षितस्य । देवता । सः । अस्मात् ।

एतर्.हि । तिरः । इव । यर्.हि । याति । तम् । ईश्वरम् । रक्षाꣳसि ।

हन्तोः । **3 (50)**

**TS 3.1.1.4**

र्भद्रादभिश्रेयः प्रेहिबृहस्पतिः पुरएता ते अस्त्वित्याहब्रह्म वै देवानां बृहस्पति–स्तमेवान्वारभते स एन(ग्)ं सं पारयत्येद–मगन्म देवयजनं पृथिव्या इत्याह देवयजन(ग्)ं ह्येष पृथिव्या आगच्छति यो यजते विश्वे देवा यदजुषन्त पूर्व इत्याह विश्वे ह्येतद्देवा जोषयन्ते यद्ब्राह्मणा ( ) ऋख्सामाभ्यां(ग्)ं यजुषा सन्तरन्त इत्याहर्ख्सामाभ्या(ग्)ं ह्येष यजुषा सन्तरति यो यजते रायस्पोषेण समिषा–मदेमेत्या–हाऽशिषमेवै तामा शास्ते ॥ **4**

**TS 3.1.1.4 (Padam)**

भद्रात् । अभीति । श्रेयः । प्रेति । इहि । बृहस्पतिः । पुरएतेति पुरः – एता । ते । अस्तु । इति । आह । ब्रह्म । वै । देवानाम् । बृहस्पतिः । तम् । एव । अन्वारभत इत्यनु – आरभते । सः । एनम् । समिति । पारयति । एति । इदम् । अगन्म । देवयजनमिति देव – यजनम् । पृथिव्याः । इति । आह । देवयजनमिति देव – यजनम् । हि । एषः । पृथिव्याः । आगच्छतीत्या – गच्छति । यः । यजते । विश्वे । देवाः । यत् । अजुषन्त । पूर्वे ।

इति । आह । विश्वे । हि । एतत् । देवाः । जोषयन्ते । यत् ।

ब्राह्मणाः ( ) । ऋख्सामाभ्यामित्यृख्सामा –भ्याम् । यजुषा ।

सन्तरन्त इति सं – तरन्तः । इति । आह ।

ऋख्सामाभ्यामित्यृख्सामा – भ्याम् । हि । एषः । यजुषा ।

सन्तरतीति सं – तरति । यः । यजते । रायः । पोषेण । समिति ।

इषा । मदेम । इति । आह । आशिषमित्या – शिषम् । एव ।

एताम् । एति । शास्ते ॥ **4 (74)**

***(यजमानो – दीक्षा॒ – हन्तो – ब्राह्मणा –श्चतुर्वि॒शतिश्च) (A1)***

**TS 3.1.2.1**

एष ते गायत्रो भाग इति मे सोमाय ब्रूतादेष ते त्रैष्टुभो जागतो भाग

इति मे सोमाय ब्रूताच्छन्दोमाना॒ साम्राज्यं गच्छेति मे सोमाय

ब्रूताद् यो वै सोम॒ राजान॒ साम्राज्यं ँलोकं गमयित्वा क्रीणाति

गच्छति स्वाना॒ साम्राज्यं छन्दा॒सि खलु वै सोमस्य राज्ञः

साम्राज्यो लोकः पुरस्ताथ् सोमस्य क्रयादेवमभि मन्त्रयेत

साम्राज्यमेवै – [ ] **5**

**TS 3.1.2.1 (Padam)**

एषः । ते । गायत्रः । भागः । इति । मे । सोमाय । ब्रूतात् । एषः ।

ते । त्रैष्टुभः । जागतः । भागः । इति । मे । सोमाय । ब्रूतात् ।

छन्दोमानामिति छन्दः – मानाम् । साम्राज्यमिति साम् – राज्यम् ।

गच्छ । इति । मे । सोमाय । ब्रूतात् । यः । वै । सोमम् । राजानम् ।

साम्राज्यमिति साम् – राज्यम् । लोकम् । गमयित्वा । क्रीणाति ।

गच्छति । स्वानाम् । साम्राज्यमिति साम् – राज्यम् । छन्दाꣳसि ।

खलु । वै । सोमस्य । राज्ञः । साम्राज्य इति साम् – राज्यः ।

लोकः । पुरस्तात् । सोमस्य । क्रयात् । एवम् । अभीति । मन्त्रयेत ।

साम्राज्यमिति साम् – राज्यम् । एव । **5 (50)**

**TS 3.1.2.2**

नं ँलोकं गमयित्वा क्रीणाति गच्छति स्वानाꣳ साम्राज्यं ँयो वै

तानूनप्त्रस्य प्रतिष्ठां ँवेद प्रत्येव तिष्ठति ब्रह्मवादिनो वदन्ति न

प्राश्ञन्ति न जुह्वत्यथ क्व तानूनप्त्रं प्रति तिष्ठतीति प्रजापतौ

मनसीति ब्रूयात् त्रिरव जिघ्रेत् प्रजापतौ त्वा मनसि जुहोमीत्येषा वै

तानूनप्त्रस्य प्रतिष्ठा य एवं ँवेद प्रत्येव तिष्ठति यो – [ ] **6**

**TS 3.1.2.2 (Padam)**

एनम् । लोकम् । गमयित्वा । क्रीणाति । गच्छति । स्वानाम् ।

साम्राज्यमिति साम् – राज्यम् । यः । वै । तानूनप्त्रस्येति

तानू – नप्त्रस्य । प्रतिष्ठामिति प्रति – स्थाम् । वेद । प्रतीति ।

एव । तिष्ठति । ब्रह्मवादिन इति ब्रह्म – वादिनः । वदन्ति । न ।

प्राश्ञन्तीति प्र – अश्ञन्ति । न । जुह्वति । अथ । क्व ।

तानूनप्त्रमिति तानू – नप्त्रम् । प्रतीति । तिष्ठति । इति ।

प्रजापताविति प्रजा–पतौ । मनसि । इति । ब्रूयात् । त्रिः । अवेति ।

जिघ्रेत् । प्रजापताविति प्रजा – पतौ । त्वा । मनसि । जुहोमि ।

इति । एषा । वै । तानूनप्त्रस्येति तानू – नप्त्रस्य ।

प्रतिष्ठेति प्रति – स्था । यः । एवम् । वेद । प्रतीति । एव ।

तिष्ठति । यः । **6 (50)**

**TS 3.1.2.3**

वा अद्ध्वर्योः प्रतिष्ठां ँवेद प्रत्येव तिष्ठति यतो मन्येतानभिक्रम्य

होष्यामीति तत् तिष्ठन्ना श्रावयेदेषा वा अद्ध्वर्योः प्रतिष्ठा य एवं

ँवेद प्रत्येव तिष्ठति यदभिक्रम्य जुहुयात् प्रतिष्ठाया इयात् तस्माथ्

समानत्र तिष्ठता होतव्यं प्रतिष्ठित्यै यो वा अद्ध्वर्योः स्वं ँवेद

स्ववानेव भवति स्रुग्वा अस्य स्वं ँवायव्यमस्य - [ ] **7**

**TS 3.1.2.3 (Padam)**

वै । अद्ध्वर्योः । प्रतिष्ठामिति प्रति - स्थाम् । वेद । प्रतीति । एव ।

तिष्ठति । यतः । मन्येत । अनभिक्रम्येत्यनभि - क्रम्य । होष्यामि ।

इति । तत् । तिष्ठन्न् । एति । श्रावयेत् । एषा । वै । अद्ध्वर्योः ।

प्रतिष्ठेति प्रति - स्था । यः । एवम् । वेद । प्रतीति । एव । तिष्ठति ।

यत् । अभिक्रम्येत्यभि - क्रम्य । जुहुयात् ।

प्रतिष्ठाया इति प्रति-स्थायाः । इयात् । तस्मात् । समानत्र । तिष्ठता ।

होतव्यम् । प्रतिष्ठित्या इति प्रति - स्थित्यै । यः । वै । अद्ध्वर्योः ।

स्वम् । वेद । स्ववानिति स्व - वान् । एव । भवति । स्रुक् । वै ।

अस्य । स्वम् । वायव्यम् । अस्य । **7 (50)**

**TS 3.1.2.4**

स्वं चमसोऽस्य स्वं ँयद्वायव्यं ँवा चमसं ँवाऽनन्वारभ्याऽऽश्रावयेथ्

स्वादियात् तस्मादन्वारभ्याऽऽश्राव्य॒ स्वादेव नैति यो वै सोमम-

प्रतिष्ठाप्य स्तोत्र-मुपाकरोत्यप्रतिष्ठितः सोमो भवत्यप्रतिष्ठितः स्तोमो-

ऽप्रतिष्ठिता–न्युक्थान्यप्रतिष्ठितो यजमानोऽप्रतिष्ठितो ऽध्वर्युर्वायव्यं वै

सोमस्य प्रतिष्ठा चमसोऽस्य प्रतिष्ठा सोमः स्तोमस्य स्तोम उक्थानां

ग्रहं वा ( ) गृहीत्वा चमसं वोन्नीय स्तोत्रमुपा कुर्यात् प्रत्येव

सोमꣳ स्थापयति प्रति स्तोमं प्रत्युक्थानि प्रति

यजमानस्तिष्ठति प्रत्यद्ध्वर्युः ॥ **8**

**TS 3.1.2.4 (Padam)**

स्वम् । चमसः । अस्य । स्वम् । यत् । वायव्यम् । वा । चमसम् ।

वा । अनन्वारभ्येत्यननु – आरभ्य । आश्रावयेदित्या – श्रावयेत् ।

स्वात् । इयात् । तस्मात् । अन्वारभ्येत्यनु – आरभ्य ।

आश्राव्यमित्या – श्राव्यम् । स्वात् । एव । न । एति । यः । वै ।

सोमम् । अप्रतिष्ठाप्येत्यप्रति – स्थाप्य । स्तोत्रम् ।

उपाकरोतीत्युप – आकरोति । अप्रतिष्ठित इत्यप्रति – स्थितः ।

सोमः । भवति । अप्रतिष्ठित इत्यप्रति – स्थितः । स्तोमः ।

अप्रतिष्ठितानीत्यप्रति – स्थितानि । उक्थानि । अप्रतिष्ठित

इत्यप्रति – स्थितः । यजमानः । अप्रतिष्ठित इत्यप्रति – स्थितः ।

अध्वर्युः । वायव्यम् । वै । सोमस्य । प्रतिष्ठेति प्रति – स्था ।
चमसः । अस्य । प्रतिष्ठेति प्रति – स्था । सोमः । स्तोमस्य ।
स्तोमः । उक्थानाम् । ग्रहम् । वा ( ) । गृहीत्वा । चमसम् । वा ।
उन्नीयेत्युत् – नीय । स्तोत्रम् । उपाकुर्यादित्युप – आकुर्यात् ।
प्रतीति । एव । सोमम् । स्थापयति । प्रतीति । स्तोमम् । प्रतीति ।
उक्थानि । प्रतीति । यजमानः । तिष्ठति । प्रतीति ।
अद्ध्वर्युः ॥ **8 (69)**

*(एव – तिष्ठति यो – वायव्यमस्य – ग्रहं वै –*
*कान्नविꣳशतिश्च) (A2)*

**TS 3.1.3.1**

यज्ञं वा एतथ् सं भरन्ति यथ् सोमक्रयण्यै पदं यज्ञमुखꣳ
हविर्द्धाने यर्.हि हविर्द्धाने प्राची प्रवर्तयेयुस्तर्.हि
तेनाक्षमुपाञ्ज्याद्–यज्ञमुख एव यज्ञमनु सन्तनोति प्राञ्चमग्निं प्र
हरन्त्युत् पत्नीमा नयन्त्यन्वनाꣳसि प्र वर्तयन्त्यथ वा अस्यैष धिष्णियो
हीयते सोऽनु ध्यायति स ईश्वरो रुद्रो भूत्वा – [ ] **9**

**TS 3.1.3.1 (Padam)**

यज्ञम् । वै । एतत् । समिति । भरन्ति । यत् । सोमक्रयण्या इति

सोम – क्रयण्यै । पदम् । यज्ञमुखमिति यज्ञ – मुखम् ।

हविर्द्धाने इति हविः – धाने । यर्.हि ।

हविर्द्धाने इति हविः – धाने । प्राची इति । प्रवर्तयेयुरिति

प्र – वर्तयेयुः । तर्.हि । तेन । अक्षम् । उपेति । अञ्ज्यात् ।

यज्ञमुख इति यज्ञ–मुखे । एव । यज्ञम् । अनु । समिति । तनोति ।

प्राञ्चम् । अग्निम् । प्रेति । हरन्ति । उदिति । पत्नीम् । एति ।

नयन्ति । अन्विति । अना॑ꣳसि । प्रेति । वर्तयन्ति । अथ । वै ।

अस्य । एषः । धिष्णियः । हीयते । सः । अन्विति । ध्यायति ।

सः । ईश्वरः । रुद्रः । भूत्वा । **9 (50)**

**TS 3.1.3.2**

प्रजां पशून् यजमानस्य शमयितोर्यर्.हि पशुमाप्रीतमुदञ्चं नयन्ति

तर्.हि तस्य पशुश्रपणꣳ हरेत् तेनैवैनं भागिनं करोति यजमानो वा

आहवनीयो यजमानं ँवा एतद्वि कर्.षन्ते यदाहवनीयात् पशुश्रपणꣳ

हरन्ति स वैव स्यान्निर्मन्थ्यं ँवा कुर्याद्–यजमानस्य सात्मत्वाय यदि

पशोरवदानं नश्येदाज्यस्य प्रत्याख्यायमव द्येथ् सैव ततः ( )

प्रायश्चित्तिर्ये पशुं ँविमथ्नीरन्. यस्तान् कामयेताऽऽ*र्तिमाच्र्छेयुरिति

कुविदङ्गेति नमोवृक्तिवत्यर्चाऽऽग्नीद्ध्रे जुहुयान्नमोवृक्तिमेवैषां ँवृङ्क्ते

ताजगार्तिमाच्र्छन्ति ॥ **10**

**TS 3.1.3.2 (Padam)**

प्रजामिति प्र – जाम् । पशून् । यजमानस्य । शमयितोः । यर्.हि ।

पशुम् । आप्रीतमित्या–प्रीतम् । उदञ्चम् । नयन्ति । तर्.हि । तस्य ।

पशुश्रपणमिति पशु – श्रपणम् । हरेत् । तेन । एव । एनम् ।

भागिनम् । करोति । यजमानः । वै । आहवनीय इत्या – हवनीयः ।

यजमानम् । वै । एतत् । वीति । कर्.षन्ते । यत् ।

आहवनीयादित्या – हवनीयात् । पशुश्रपणमिति पशु – श्रपणम् ।

हरन्ति । सः । वा । एव । स्यात् । निर्मन्थ्यमिति निः – मन्थ्यम् ।

वा । कुर्यात् । यजमानस्य । सात्मत्वायेति सात्म – त्वाय । यदि ।

पशोः । अवदानमित्यव – दानम् । नश्येत् । आज्यस्य ।

प्रत्याख्यायमिति प्रति – आख्यायम् । अवेति । द्येत् । सा । एव ।

ततः ( ) । प्रायश्चित्तिः । ये । पशुम् । विमथ्नीरन्निति

वि – मथ्नीरन् । यः । तान् । कामयेत । आर्तिम् । एति । ऋच्छेयुः ।

इति । कुवित् । अङ्ग । इति । नमोवृक्तिवत्येति नमोवृक्ति – वत्या ।

ऋचा । आग्नीद्ध्र इत्याग्नि – इध्रे । जुहुयात् । नमोवृक्तिमिति

नमः – वृक्तिम् । एव । एषाम् । वृङ्क्ते । ताजक् । आर्तिम् । एति ।

ऋच्छन्ति ॥ **10 (76)** ***(भूत्वा – ततः – षड्विꣳशतिश्च) (A3)***

**TS 3.1.4.1**

प्रजापतेर्जायमानाः प्रजा जाताश्च या इमाः ।

तस्मै प्रति प्र वेदयचिकित्वाꣳ अनु मन्यतां ॥

इमं पशुं पशुपते ते अद्य बद्ध्नाम्यग्ने सुकृतस्य मद्ध्ये ।

अनु मन्यस्व सुयजा यजाम जुष्टं देवानामिदमस्तु हव्यं ॥

प्रजानन्तः प्रति गृह्णन्ति पूर्वे प्राणमङ्गेभ्यः पर्याचरन्तं ।

सुवर्गं याहि पथिभि र्देवयानै–रोषधीषु प्रति तिष्ठा शरीरैः ॥

येषामीशे – [ ] 11

**TS 3.1.4.1 (Padam)**

प्रजापतेरिति प्रजा – पतेः । जायमानाः । प्रजा इति प्र – जाः ।

जाताः । च । याः । इमाः ॥ तस्मै । प्रति । प्रेति । वेदय ।

चिकित्वान् । अन्विति । मन्यताम् ॥ इमम् । पशुम् ।

पशुपत इति पशु – पते । ते । अद्य । बद्ध्नामि । अग्ने ।

सुकृतस्येति सु – कृतस्य । मद्ध्ये ॥ अन्विति । मन्यस्व ।

सुयजेति सु – यजा । यजाम । जुष्टम् । देवानाम् । इदम् । अस्तु ।

हव्यम् ॥ प्रजानन्त इति प्र – जानन्तः । प्रतीति । गृह्णन्ति । पूर्वे ।

प्राणमिति प्र – अनम् । अङ्गेभ्यः । परीति ।

आचरन्तमित्या – चरन्तम् ॥ सुवर्गमिति सुवः – गम् । याहि ।

पथिभिरिति पथि – भिः । देवयानैरिति देव – यानैः । ओषधीषु ।

प्रतीति । तिष्ठ । शरीरैः ॥ येषाम् । ईशे । **11 (50)**

**TS 3.1.4.2**

पशुपतिः पशूनां चतुष्पदामुत च द्विपदां ।

निष्क्रीतोऽयं यज्ञियं भागमेतु रायस्पोषा यजमानस्य सन्तु ॥

ये बद्ध्यमानमनु बद्ध्यमाना अभ्यैक्षन्त मनसा चक्षुषा च ।

अग्निस्ता᳚ँ अग्रे प्र मुमोक्तु देवः प्रजापतिः प्रजया सँविदानः ॥

य आरण्याः पशवो विश्वरूपा विरूपाः सन्तो बहुधैकरूपाः ।

वायुस्ता᳚ँ अग्रे प्र मुमोक्तु देवः प्रजापतिः प्रजया सँविदानः ॥

प्रमुञ्चमाना – [ ] **12**

**<u>TS 3.1.4.2 (Padam)</u>**

पशुपतिरिति पशु–पतिः । पशूनाम् । चतुष्पदामिति चतुः – पदाम् ।

उत । च । द्विपदामिति द्वि – पदाम् ॥ निष्क्रीत इति निः – क्रीतः ।

अयम् । यज्ञियम् । भागम् । एतु । रायः । पोषाः । यजमानस्य ।

सन्तु ॥ ये । बद्ध्यमानम् । अन्विति । बद्ध्यमानाः ।

अभ्यैक्षन्तेत्यभि – ऐक्षन्त । मनसा । चक्षुषा । च ॥ अग्निः ।

तान् । अग्रे । प्रेति । मुमोक्तु । देवः । प्रजापतिरिति प्रजा – पतिः ।

प्रजयेति प्र – जया । सँविदान इति सं–विदानः ॥ ये । आरण्याः ।

पशवः । विश्वरूपा इति विश्व – रूपाः । विरूपा इति वि–रूपाः ।

सन्तः । बहुधेति बहु – धा । एकरूपा इत्येक – रूपाः ॥ वायुः ।

तान् । अग्रे । प्रेति । मुमोक्तु । देवः । प्रजापतिरिति प्रजा – पतिः ।

प्रजयेति प्र – जया । सँविदान इति सं – विदानः ॥

प्रमुञ्चमाना इति प्र – मुञ्चमानाः । **12 (50)**

**TS 3.1.4.3**

भुवनस्य रेतो गातुं धत्त यजमानाय देवाः ।

उपाकृतꣳ शशमानं ँयदस्थाज्जीवं देवानामप्येतु पाथः ॥

नाना प्राणो यजमानस्य पशुना यज्ञो देवेभिः सह देवयानः ।

जीवं देवानामप्येतु पाथः सत्याः सन्तु यजमानस्य कामाः ॥

यत् पशुर्मायुमकृतोरो वा पद्भिराहते ।

अग्निर्मा तस्मादेनसो विश्वान् मुञ्चत्वꣳहसः ॥

शमितार उपेतन यज्ञं – [ ] **13**

**TS 3.1.4.3 (Padam)**

भुवनस्य । रेतः । गातुम् । धत्त । यजमानाय । देवाः ॥

उपाकृतमित्युप–आकृतम् । शशमानम् । यत् । अस्थात् । जीवम् ।

देवानाम् । अपीति । एतु । पाथः ॥ नाना । प्राण इति प्र – अनः ।

यजमानस्य । पशुना । यज्ञः । देवेभिः । सह । देवयान इति

देव – यानः ॥ जीवम् । देवानाम् । अपीति । एतु । पाथः ।

सत्याः । सन्तु । यजमानस्य । कामाः ॥ यत् । पशुः । मायुम् ।

अकृत । उरः । वा । पद्भिरिति पत् – भिः । आहत इत्या – हते ॥

अग्निः । मा । तस्मात् । एनसः । विश्वात् । मुञ्चतु । अꣳहसः ॥

शमितारः । उपेतनेत्युप – एतन । यज्ञम् । **13 (50)**

**TS 3.1.4.4**

देवेभिरन्वितं ।

पाशात् पशुं प्र मुञ्चत बन्धाद्यज्ञपतिं परि ॥

अदितिः पाशं प्र मुमोक्त्वेतं नमः पशुभ्यः पशुपतये करोमि ॥

अरातीयन्त–मधरं कृणोमि यं द्विष्मस्तस्मिन् प्रति मुञ्चामि पाशं ॥

त्वामु ते दधिरे हव्यवाहꣳ शृतंकर्तारमुत यज्ञियं च ।

अग्ने सदक्षः सतनुर्. हि भूत्वाऽथ हव्या जातवेदो जुषस्व ॥

जातवेदो वपया गच्छ देवान् त्वꣳ ( ) हि होता प्रथमो बभूथ ।

घृतेन त्वं तनुवो वर्द्धयस्व स्वाहाकृतꣳ हविरदन्तु देवाः ॥

स्वाहा देवेभ्यो देवेभ्यः स्वाहा ॥ **14**

**TS 3.1.4.4 (Padam)**

देवेभिः । इन्वितम् ॥ पाशात् । पशुम् । प्रेति । मुञ्चत । बन्धात् ।
यज्ञपतिमिति यज्ञ – पतिम् । परि ॥ अदितिः । पाशम् । प्रेति ।
मुमोक्तु । एतम् । नमः । पशुभ्य इति पशु – भ्यः ।
पशुपतय इति पशु – पतये । करोमि ॥ अरातीयन्तम् । अधरम् ।
कृणोमि । यम् । द्विष्मः । तस्मिन्न् । प्रतीति । मुञ्चामि । पाशम् ॥
त्वाम् । उ । ते । दधिरे । हव्यवाहमिति हव्य – वाहम् ।
शृतंकर्तारमिति शृतं – कर्तारम् । उत । यज्ञियम् । च ॥ अग्ने ।
सदक्ष इति स – दक्षः । सतनुरिति स–तनुः । हि । भूत्वा । अथ ।
हव्या । जातवेद इति जात – वेदः । जुषस्व ॥ जातवेद इति
जात – वेदः । वपया । गच्छ । देवान् । त्वम् ( ) । हि । होता ।
प्रथमः । बभूथ ॥ घृतेन । त्वम् । तनुवः । वर्द्धयस्व ।
स्वाहाकृतमिति स्वाहा – कृतम् । हविः । अदन्तु । देवाः ॥
स्वाहा । देवेभ्यः । देवेभ्यः । स्वाहा ॥ **14 (66)**

***(ईशे – प्रमुञ्चमाना – यज्ञं – त्व९ – षोडश च) (A4)***

**TS 3.1.5.1**

प्राजापत्या वै पशवस्तेषाꣳ रुद्रोऽधिपतिर्य-देताभ्या-मुपाकरोति ताभ्यामेवैनं प्रतिप्रोच्या ऽऽ लभत आत्मनोऽनाव्रस्काय द्वाभ्यामुपाकरोति द्विपाद्यजमानः प्रतिष्ठित्या उपाकृत्य पञ्च जुहोति पाङ्क्ताः पशवः पशूनेवाव रुन्धेमृत्यवे वा एष नीयते यत् पशुस्तं ँयदन्वारभेत प्रमायुको यजमानः स्यान्नाना प्राणो यजमानस्य पशुनेत्याह व्यावृत्त्यै - [ ] **15**

**TS 3.1.5.1 (Padam)**

प्राजापत्या इति प्राजा - पत्याः । वै । पशवः । तेषाम् । रुद्रः । अधिपतिरित्यधि - पतिः । यत् । एताभ्याम् । उपाकरोतीत्युप - आकरोति । ताभ्याम् । एव । एनम् । प्रतिप्रोच्येति प्रति - प्रोच्य । एति । लभते । आत्मनः । अनाव्रस्कायेत्यना - व्रस्काय । द्वाभ्याम् । उपाकरोतीत्युप - आकरोति । द्विपादिति द्वि - पात् । यजमानः । प्रतिष्ठित्या इति प्रति - स्थित्यै । उपाकृत्येत्युप - आकृत्य । पञ्च । जुहोति । पाङ्क्ताः । पशवः । पशून् । एव । अवेति । रुन्धे । मृत्यवे ।

वै । एषः । नीयते । यत् । पशुः । तम् । यत् । अन्वारभेतेत्यनु – आरभेत । प्रमायुक इति प्र – मायुकः । यजमानः । स्यात् । नाना । प्राण इति प्र – अनः । यजमानस्य । पशुना । इति । आह । व्यावृत्त्या इति वि – आवृत्त्यै । **15 (50)**

**<u>TS 3.1.5.2</u>**

यत् पशुर्मायुमकृतेति जुहोति शान्त्यै शमितार उपेतनेत्याह यथायजुरेवैतद्वपायां ँवा आह्रियमाणाया–मग्नेर्मेधोऽप क्रामति त्वामु ते दधिरे हव्यवाहमिति वपामभि जुहोत्यग्नेरेव मेधमव रुन्धेऽथो शृतत्वाय पुरस्ताथ्स्वाहाकृतयो वा अन्ये देवा उपरिष्टाथ् स्वाहाकृतयोऽन्ये स्वाहा देवेभ्यो देवेभ्यः स्वाहेत्यभितो वपां ( ) जुहोति तानेवोभयान् प्रीणाति ॥ **16**

**<u>TS 3.1.5.2 (Padam)</u>**

यत् । पशुः । मायुम् । अकृत । इति । जुहोति । शान्त्यै । शमितारः । उपेतनेत्युप – एतन । इति । आह । यथायजुरिति यथा – यजुः । एव । एतत् । वपायाम् । वै । आह्रियमाणायामित्या – ह्रियमाणायाम् । अग्नेः । मेधः । अपेति ।

क्रामति । त्वाम् । उ । ते । दधिरे । हव्यवाहमिति हव्य – वाहम् ।

इति । वपाम् । अभीति । जुहोति । अग्नेः । एव । मेधम् । अवेति ।

रुन्धे । अथो इति । शृतत्वायेति शृत – त्वाय । पुरस्ताथ्स्वाहाकृतय

इति पुरस्तात् – स्वाहाकृतयः । वै । अन्ये । देवाः ।

उपरिष्टाथ्स्वाहाकृतय इत्युपरिष्टात् – स्वाहाकृतयः ।

अन्ये । स्वाहा । देवेभ्यः । देवेभ्यः । स्वाहा । इति । अभितः ।

वपाम् ( ) । जुहोति । तान् । एव । उभयान् । प्रीणाति ॥ **16 (55)**

*(व्यावृत्त्या – अभितो वपां – पञ्च च) (A5)*

**TS 3.1.6.1**

यो वा अयथादेवतं ँयज्ञमुपचरत्या देवताभ्यो वृश्च्यते पापीयान् भवति

यो यथादेवतन्न देवताभ्य आ वृश्च्यते वसीयान् भवत्याग्नेय्यर्चा

ऽऽग्नीद्ध्रमभि मृशेद् वैष्णव्या हविर्द्धानमाग्नेय्या स्रुचो वायव्यया

वायव्यान्यैन्द्रिया सदो यथादेवतमेव यज्ञमुप चरति न देवताभ्य आ

वृश्च्यते वसीयान् भवति युनज्मि ते पृथिवीं ज्योतिषा सह युनज्मि

वायुमन्तरिक्षेण – [ ] **17**

**TS 3.1.6.1 (Padam)**

यः । वै । अयथादेवतमित्ययथा – देवतम् । यज्ञम् ।

उपचरतीत्युप – चरति । एति । देवताभ्यः । वृश्च्यते । पापीयान् ।

भवति । यः । यथादेवतमिति यथा–देवतम् । न । देवताभ्यः । एति ।

वृश्च्यते । वसीयान् । भवति । आग्नेय्या । ऋचा ।

आग्नीद्ध्रमित्याग्नि – इद्ध्रम् । अभीति । मृशेत् । वैष्णव्या ।

हविर्द्धानमिति हविः – धानम् । आग्नेय्या । स्रुचः । वायव्यया ।

वायव्यानि । ऐन्द्रिया । सदः । यथादेवतमिति यथा–देवतम् ।

एव । यज्ञम् । उपेति । चरति । न । देवताभ्यः । एति । वृश्च्यते ।

वसीयान् । भवति । युनज्मि । ते । पृथिवीम् । ज्योतिषा । सह ।

युनज्मि । वायुम् । अन्तरिक्षेण । **17 (50)**

**TS 3.1.6.2**

ते सह युनज्मि वाचꣳ सह सूर्येण ते युनज्मि तिस्रो विपृचः

सूर्यस्य ते ।

अग्निर्देवता गायत्री छन्द उपाꣳशोः पात्रमसि सोमो देवता त्रिष्टुप्

छन्दोऽन्तर्यामस्य पात्रमसीन्द्रो देवता जगती छन्द इन्द्रवायुवोः

पात्रमसि बृहस्पति र्देवताऽनुष्टुप् छन्दो मित्रावरुणयोः पात्रमस्यश्विनौ देवता पङ्क्तिश्छन्दोऽश्विनोः पात्रमसि सूर्यो देवता बृहती – [ ] **18**

**TS 3.1.6.2 (Padam)**

ते । सह । युनज्मि । वाचम् । सह । सूर्येण । ते । युनज्मि । तिस्रः । विपृच इति वि – पृचः । सूर्यस्य । ते ॥ अग्निः । देवता । गायत्री । छन्दः । उपा॒ꣳशोरित्युप – अ॒ꣳशोः । पात्रम् । असि । सोमः । देवता । त्रिष्टुप् । छन्दः । अन्तर्यामस्येत्यन्तः – यामस्य । पात्रम् । असि । इन्द्रः । देवता । जगती । छन्दः । इन्द्रवायुवोरितीन्द्र–वायुवोः । पात्रम् । असि । बृहस्पतिः । देवता । अनुष्टुबित्यनु – स्तुप् । छन्दः । मित्रावरुणयोरिति मित्रा–वरुणयोः । पात्रम् । असि । अश्विनौ । देवता । पङ्क्तिः । छन्दः । अश्विनोः । पात्रम् । असि । सूर्यः । देवता । बृहती । **18 (50)**

**TS 3.1.6.3**

छन्दः शुक्रस्य पात्रमसि चन्द्रमा देवता सतोबृहती छन्दो मन्थिनः पात्रमसि विश्वेदेवा देवतोष्णिहा छन्द आग्रयणस्य पात्रमसीन्द्रो देवता

ककुच्छन्द उक्थानां पात्रमसि पृथिवी देवता विराट् छन्दो

ध्रुवस्य पात्रमसि ॥ **19**

**TS 3.1.6.3 (Padam)**

छन्दः । शुक्रस्य । पात्रम् । असि । चन्द्रमाः । देवता ।

सतोबृहतीति सतः – बृहती । छन्दः । मन्थिनः । पात्रम् । असि ।

विश्वे । देवाः । देवता । उष्णिहा । छन्दः । आग्रयणस्य । पात्रम् ।

असि । इन्द्रः । देवता । ककुत् । छन्दः । उक्थानाम् । पात्रम् ।

असि । पृथिवी । देवता । विराडिति वि – राट् । छन्दः । ध्रुवस्य ।

पात्रम् । असि ॥ **19 (33)**

*(अन्तरिक्षेण – बृहती – त्रयस्त्रिꣳशच्च) (A6)*

**TS 3.1.7.1**

इष्टर्गो वा अद्ध्वर्युर्यजमानस्येष्टर्गः खलु वै पूर्वोऽर्ष्टुः क्षीयत

आसन्यान्मा मन्त्रात् पाहि कस्याश्चिदभिशस्त्या इति पुरा

प्रातरनुवाकाज्जुहुयादात्मन एव तदद्ध्वर्युः पुरस्ताच्छर्म नह्यतेऽनार्त्यै

सँवेशाय त्वोपवेशाय त्वा गायत्रिया स्त्रिष्टुभो जगत्या अभिभूत्यै

स्वाहा प्राणापानौ मृत्योर्मा पातं प्राणापानौ मा मा हासिष्टं देवतासु

वा एते प्राणापानयोर् – [ ] **20**

**TS 3.1.7.1 (Padam)**

इष्टर्गः । वै । अद्ध्वर्युः । यजमानस्य । इष्टर्गः । खलु । वै । पूर्वः ।

अर्ष्टुः । क्षीयते । आसन्यात् । मा । मन्त्रात् । पाहि । कस्याः ।

चित् । अभिशस्त्या इत्यभि – शस्त्याः । इति । पुरा ।

प्रातरनुवाकादिति प्रातः – अनुवाकात् । जुहुयात् । आत्मने । एव ।

तत् । अद्ध्वर्युः । पुरस्तात् । शर्म । नह्यते । अनार्त्यै । सँवेशायेति

सं – वेशाय । त्वा । उपवेशायेतुप – वेशाय । त्वा । गायत्रियाः ।

त्रिष्टुभः । जगत्याः । अभिभूत्या इत्यभि – भूत्यै । स्वाहा ।

प्राणापानाविति प्राण – अपानौ । मृत्योः । मा । पातम् ।

प्राणापानाविति प्राण – अपानौ । मा । मा । हासिष्टम् । देवतासु ।

वै । एते । प्राणापानयोरिति प्राण – अपानयोः । **20 (50)**

**TS 3.1.7.2**

व्यायच्छन्ते येषा॒ꣳ सोमः समृच्छते सँवेशाय त्वोपवेशाय

त्वेत्याह छन्दा॒ꣳसि वै सँवेश उपवेशश्छन्दोभिरेवास्य छन्दा॒ꣳसि

वृङ्क्ते प्रेतिवन्त्याज्यानि भवन्त्यभिजित्यै मरुत्वतीः प्रतिपदो

विजित्या उभे बृहद्रथन्तरे भवत इयं ँवाव रथन्तरमसौ

बृहदाभ्यामेवैनमन्तरेत्यद्य वाव रथन्तर७ श्वो बृहदद्याश्वा

देवैनमन्तरेति भूतं – [ ] **21**

**TS 3.1.7.2 (Padam)**

व्यायच्छन्त इति वि – आयच्छन्ते । येषाम् । सोमः ।

समृच्छत इति सं – ऋच्छते । सँवेशायेति सं – वेशाय । त्वा ।

उपवेशायेत्युप – वेशाय । त्वा । इति । आह । छन्दा७ंसि । वै ।

सँवेश इति सं – वेशः । उपवेश इत्युप – वेशः ।

छन्दोभिरिति छन्दः – भिः । एव । अस्य । छन्दा७ंसि । वृङ्क्ते ।

प्रेतिवन्तीति प्रेति – वन्ति । आज्यानि । भवन्ति । अभिजित्या

इत्यभि – जित्यै । मरुत्वतीः । प्रतिपद इति प्रति – पदः ।

विजित्या इति वि – जित्यै । उभे इति ।

बृहद्रथन्तरे इति बृहत् – रथन्तरे । भवतः । इयम् । वाव ।

रथन्तरमिति रथम्–तरम् । असौ । बृहत् । आभ्याम् । एव । एनम् ।

अन्तः । एति । अद्य । वाव । रथन्तरमिति रथम् – तरम् । श्वः ।

बृहत् । अद्याश्वादित्यद्य – श्वात् । एव । एनम् ।

अन्तः । एति । भूतम् । **21 (50)**

**TS 3.1.7.3**

ँवाव रथन्तरं भविष्यद्–बृहद् भूताच्चैवैनं भविष्यतश्चान्तरेतिपरिमितं

ँवाव रथन्तरमपरिमितं बृहत् परिमिताच्चैवैन–मपरिमिताच्चाऽन्तरेति

विश्वामित्रजमदग्नी वसिष्ठेनास्पर्द्धेता॒ स एतज्जमदग्नि र्विहव्यम

पश्यत् तेन वै स वसिष्ठस्येन्द्रियं ँवीर्यमवृङ्क्त यद्विहव्य॒ शस्यत

इन्द्रियमेव तद्वीर्यं ँयजमानो भ्रातृव्यस्य वृङ्क्ते ( ) यस्य भूया॒सो

यज्ञक्रतव इत्याहुः स देवता वृङ्क्त इति यद्यग्निष्टोमः सोमः परस्ताथ्

स्या–दुक्थ्यं कुर्वीत यद्युक्थ्यः स्यादतिरात्रं कुर्वीत यज्ञक्रतुभिरेवास्य

देवता वृङ्क्ते वसीयान् भवति ॥ **22**

**TS 3.1.7.3 (Padam)**

वाव । रथन्तरमिति रथम् – तरम् । भविष्यत् । बृहत् । भूतात् । च ।

एव । एनम् । भविष्यतः । च । अन्तः । एति ।

परिमितमिति परि – मितम् । वाव । रथन्तरमिति रथम् – तरम् ।

अपरिमितमित्यपरि – मितम् । बृहत् । परिमितादिति परि – मितात् । च । एव । एनम् । अपरिमितादित्यपरि – मितात् । च । अन्तः । एति । विश्वामित्रजमदग्नी इति विश्वामित्र – जमदग्नी । वसिष्ठेन । अस्पर्द्धेताम् । सः । एतत् । जमदग्निः । विहव्यमिति वि – हव्यम् । अपश्यत् । तेन । वै । सः । वसिष्ठस्य । इन्द्रियम् । वीर्यम् । अवृङ्क्त । यत् । विहव्यमिति वि – हव्यम् । शस्यते । इन्द्रियम् । एव । तत् । वीर्यम् । यजमानः । भ्रातृव्यस्य । वृङ्क्ते ( ) । यस्य । भूयाꣳसः । यज्ञक्रतव इति यज्ञ – क्रतवः । इति । आहुः । सः । देवताः । वृङ्क्ते । इति । यदि । अग्निष्टोम इत्यग्नि–स्तोमः । सोमः । परस्तात् । स्यात् । उक्थ्यम् । कुर्वीत । यदि । उक्थ्यः । स्यात् । अतिरात्रमित्यति – रात्रम् । कुर्वीत । यज्ञक्रतुभिरिति यज्ञक्रतु – भिः । एव । अस्य । देवताः । वृङ्क्ते । वसीयान् । भवति ॥ **22 (78)**

*(प्राणापानयो – र्भूतं – वृँङ्क्ते – ऽष्टाविꣳशतिश्च) (A7)*

**TS 3.1.8.1**

निग्राभ्याः स्थ देवश्रुत आयुर्मे तर्पयत प्राणं मे तर्पयतापानं मे तर्पयत व्यानं मे तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयत मनोमे तर्पयत वाचं मे तर्पयताऽऽ*त्मानं मे तर्पयताङ्गानि मे तर्पयत प्रजां मे तर्पयत पशून् मे तर्पयत गृहान् मे तर्पयत गणान् मे तर्पयत सर्वगणं मा तर्पयत तर्पयत मा – [ ] **23**

**TS 3.1.8.1 (Padam)**

निग्राभ्या इति नि – ग्राभ्याः । स्थ । देवश्रुत इति देव – श्रुतः । आयुः । मे । तर्पयत । प्राणमिति प्र– अनम् । मे । तर्पयत । अपानमित्यप – अनम् । मे । तर्पयत । व्यानमिति वि – अनम् । मे । तर्पयत । चक्षुः । मे । तर्पयत । श्रोत्रम् । मे । तर्पयत । मनः । मे । तर्पयत। वाचम् । मे । तर्पयत । आत्मानम् । मे । तर्पयत । अङ्गानि । मे । तर्पयत । प्रजामिति प्र – जाम् । मे । तर्पयत । पशून् । मे । तर्पयत । गृहान् । मे । तर्पयत । गणान् । मे । तर्पयत । सर्वगणमिति सर्व – गणम् । मा । तर्पयत । तर्पयत । मा । **23 (50)**

**TS 3.1.8.2**

गणा मे मा वि तृषन्नोषधयो वै सोमस्य विशो विशः खलु वै

राज्ञः प्रदातोरीश्वरा ऐन्द्रः सोमोऽवीवृधं ँवो मनसा सुजाता

ऋतप्रजाता भग इद्वः स्याम ।

इन्द्रेण देवीर्वीरुधः सँविदाना अनु मन्यन्ता॒ सवनाय

सोममित्याहौषधीभ्य एवैन॑ स्वायै विशः स्वायै देवतायै निर्याच्याभि

षुणोति यो वै सोमस्याभिषूयमाणस्य – [ ] **24**

**TS 3.1.8.2 (Padam)**

गणाः । मे । मा । वीति । तृषन्न् । ओषधयः । वै । सोमस्य ।

विशः । विशः । खलु । वै । राज्ञः । प्रदातोरिति प्र – दातोः ।

ईश्वराः । ऐन्द्रः । सोमः । अवीवृधम् । वः । मनसा । सुजाता इति

सु – जाताः । ऋतप्रजाता इत्यृत – प्रजाताः । भगे । इत् । वः ।

स्याम ॥ इन्द्रेण । देवीः । वीरुधः । सँविदाना इति सं – विदानाः ।

अन्विति । मन्यन्ताम् । सवनाय । सोमम् । इति । आह । ओषधीभ्य

इत्योषधि – भ्यः । एव । एनम् । स्वायै । विशः । स्वायै । देवतायै ।

निर्याच्येति निः – याच्य । अभीति । सुनोति । यः । वै । सोमस्य ।

अभिषूयमाणस्येत्यभि – सूयमाणस्य । **24 (50)**

**TS 3.1.8.3**

प्रथमोऽ॒ꣳशुः स्कन्दति स ईश्वर इन्द्रियं ँवीर्यं प्रजां पशून्

यजमानस्य निर्.हन्तोस्तमभि मन्त्रयेताऽऽ माऽस्कान्थ्सह प्रजया सह

रायस्पोषेणेन्द्रियं मे वीर्यं मा निर्वधीरित्याशिषमेवैतामा शास्त

इन्द्रियस्य वीर्यस्य प्रजायै पशूनामनिर्घाताय द्रफ्सश्चस्कन्द

पृथिवीमनु द्यामिमञ्च योनिमनु यश्च ( ) पूर्वः ।

तृतीयं ँयोनिमनु सञ्चरन्तं द्रफ्सं जुहोम्यनु सप्त होत्राः ॥ **25**

**TS 3.1.8.3 (Padam)**

प्रथमः । अ॒ꣳशुः । स्कन्दति । सः । ईश्वरः । इन्द्रियम् । वीर्यम् ।

प्रजामिति प्र – जाम् । पशून् । यजमानस्य । निर्.हन्तोरिति

निः – हन्तोः । तम् । अभीति । मन्त्रयेत । एति । मा । अस्कान् ।

सह । प्रजयेति प्र – जया । सह । रायः । पोषेण । इन्द्रियम् । मे ।

वीर्यम् । मा । निरिति । वधीः । इति । आशिषमित्या–शिषम् । एव ।

एताम् । एति । शास्ते । इन्द्रियस्य । वीर्यस्य ।

प्रजाया इति प्र – जायै । पशूनाम् । अनिर्घातायेत्यनिः – घाताय ।
द्रप्सः । चस्कन्द । पृथिवीम् । अन्विति । द्याम् । इमम् । च ।
योनिम् । अन्विति । यः । च ( ) । पूर्वः । तृतीयम् । योनिम् ।
अन्विति । सञ्चरन्तमिति सं – चरन्तम् । द्रप्सम् ।
जुहोमि । अन्विति । सप्त । होत्राः ॥ **25 (60)**

*(तर्पयत मा – ऽभिषूयमाणस्य – यश्च – दश च) (A8)*

**TS 3.1.9.1**

यो वै देवान् देवयशसेनार्पयति मनुष्यान् मनुष्ययशसेन देवयशस्येव
देवेषु भवति मनुष्ययशसी मनुष्येषु यान् प्राचीन–माग्रयणाद्
ग्रहान् गृह्णीयात् तानुपा॒ꣳशु गृह्णीयाद्यानूर्द्ध्वाꣳ–स्तानुपब्दिमतो
देवानेव तद्देवयशसेनार्पयति मनुष्यान् मनुष्ययशसेन देवयशस्येव
देवेषु भवति मनुष्ययशसी मनुष्येष्वग्निः प्रातस्सवने पात्वस्मान्.
वैश्वानरो महिना विश्वशम्भूः ।
स नः पावको द्रविणं दधात्वा – [ ] **26**

**TS 3.1.9.1 (Padam)**

यः । वै । देवान् । देवयशसेनेति देव – यशसेन । अर्पयति ।

मनुष्यान् । मनुष्ययशसेनेति मनुष्य – यशसेन ।

देवयशसीति देव – यशसी । एव । देवेषु । भवति ।

मनुष्ययशसीति मनुष्य–यशसी । मनुष्येषु । यान् । प्राचीनम् ।

आग्रयणात् । ग्रहान् । गृह्णीयात् । तान् । उपाꣳश्वित्युप – अꣳशु ।

गृह्णीयात् । यान् । ऊर्द्ध्वान् । तान् । उपब्दिमत इत्युपब्दि – मतः ।

देवान् । एव । तत् । देवयशसेनेति देव – यशसेन । अर्पयति ।

मनुष्यान् । मनुष्ययशसेनेति मनुष्य – यशसेन ।

देवयशसीति देव – यशसी । एव । देवेषु । भवति ।

मनुष्ययशसीति मनुष्य – यशसी । मनुष्येषु । अग्निः ।

प्रातस्सवन इति प्रातः – सवने । पातु ।

अस्मान् । वैश्वानरः । महिना । विश्वशम्भूरिति विश्व – शम्भूः ॥

सः । नः । पावकः । द्रविणम् । दधातु । **26 (50)**

**TS 3.1.9.2**

–युष्मन्तः सहभक्षाः स्याम ॥

विश्वे देवा मरुत इन्द्रो अस्मानस्मिन् द्वितीये सवने न जह्युः ।

आयुष्मन्तः प्रियमेषां ँवदन्तो वयं देवाना७ँ सुमतौ स्याम ॥

इदं तृतीय७ँ सवनं कवीनामृतेन ये चमसमैरयन्त ।

ते सौधन्वनाः सुवरानशानाः स्विष्टिं नो अभि वसीयो नयन्तु ॥

आयतनवतीर्वा अन्या आहुतयो हूयन्तेऽनायतना अन्या या

आघारवतीस्ता आयतनवतीर्याः – [ ] **27**

**TS 3.1.9.2 (Padam)**

आयुष्मन्तः । सहभक्षा इति सह–भक्षाः । स्याम ॥ विश्वे । देवाः ।

मरुतः । इन्द्रः । अस्मान् । अस्मिन्न् । द्वितीये । सवने । न ।

जह्युः ॥ आयुष्मन्तः । प्रियम् । एषाम् । वदन्तः । वयम् । देवानाम् ।

सुमताविति सु – मतौ । स्याम ॥ इदम् । तृतीयम् । सवनम् ।

कवीनाम् । ऋतेन । ये । चमसम् । ऐरयन्त ॥ ते । सौधन्वनाः ।

सुवः । आनशानाः । स्विष्टिमिति सु – इष्टिम् । नः । अभीति ।

वसीयः । नयन्तु ॥ आयतनवतीरित्यायतन – वतीः । वै । अन्याः ।

आहुतय इत्या - हुतयः । हूयन्ते । अनायतना इत्यना - यतनाः ।
अन्याः । याः । आघारवतीरित्याघार - वतीः । ताः ।
आयतनवतीरित्यायतन - वतीः । याः । **27 (50)**

**TS 3.1.9.3**

सौम्यास्ता अनायतना ऐन्द्रवायव-मादायाऽऽ*घारमा घारयेदद्ध्वरो
यज्ञोऽयमस्तु देवा ओषधीभ्यः पशवे नो जनाय विश्वस्मै
भूतायाऽद्ध्वरोऽसि स पिन्वस्व घृतवद्देव सोमेति सौम्या एव
तदाहुतीरायतनवतीः करोत्यायतनवान् भवति य एवं वेदाथो
द्यावापृथिवी एव घृतेन व्युनत्ति ते व्युत्ते उपजीवनीये भवत
उपजीवनीयो भवति - [ ] **28**

**TS 3.1.9.3 (Padam)**

सौम्याः । ताः । अनायतना इत्यना - यतनाः ।
ऐन्द्रवायवमित्यैन्द्र - वायवम् । आदायेत्या - दाय ।
आघारमित्या - घारम् । एति । घारयेत् । अद्ध्वरः । यज्ञः । अयम् ।
अस्तु । देवाः । ओषधीभ्य इत्योषधि-भ्यः । पशवे । नः । जनाय ।
विश्वस्मै । भूताय । अध्वरः । असि । सः । पिन्वस्व ।

घृतवदिति घृत - वत् । देव । सोम । इति । सौम्याः । एव । तत् ।
आहुतीरित्या - हुतीः । आयतनवतीरित्यायतन - वतीः । करोति ।
आयतनवानित्यायतन - वान् । भवति । यः । एवम् । वेद ।
अथो इति । द्यावापृथिवी इति द्यावा-पृथिवी । एव । घृतेन ।
वीति । उनत्ति । ते इति । व्युत्ते इति वि - उत्ते ।
उपजीवनीये इत्युप - जीवनीये । भवतः ।
उपजीवनीय इत्युप - जीवनीयः । भवति । **28 (50)**

**TS 3.1.9.4**

य एवं वेदैष ते रुद्रभागो यं निरयाचथास्तं जुषस्व विदेर्गौपत्यꣳ
रायस्पोषꣳ सुवीर्यꣳ सँवथ्सरीणाꣳ स्वस्तिं ॥
मनुः पुत्रेभ्यो दायं व्यभजथ् स नाभानेदिष्ठं ब्रह्मचर्यं वसन्तं
निरभजथ् स आऽगच्छथ् सोऽब्रवीत् कथा मा निरभागिति न त्वा
निरभाक्षमित्य-ब्रवीदङ्गिरस इमे सत्रमासते ते - [ ] **29**

**TS 3.1.9.4 (Padam)**

यः । एवम् । वेद । एषः । ते । रुद्र । भागः । यम् । निरयाचथा इति
निः-अयाचथाः । तम् । जुषस्व । विदेः । गौपत्यम् । रायः ।

पोषम् । सुवीर्यमिति सु – वीर्यम् । सँवथ्सरीणामिति सं – वथ्सरीणाम् । स्वस्तिम् ॥ मनुः । पुत्रेभ्यः । दायम् । वीति । अभजत् । सः । नाभानेदिष्ठम् । ब्रह्मचर्यमिति ब्रह्म–चर्यम् । वसन्तम् । निरिति । अभजत् । सः । एति । अगच्छत् । सः । अब्रवीत् । कथा । मा । निरिति । अभाक् । इति । न । त्वा । निरिति । अभाक्षम् । इति । अब्रवीत् । अङ्गिरसः । इमे । सत्रम् । आसते । ते । **29 (50)**

**TS 3.1.9.5**

सुवर्गं ँलोकं न प्र जानन्ति तेभ्य इदं ब्राह्मणं ब्रूहि ते सुवर्गं ँलोकं ँयन्तो य एषां पशवस्ताꣳस्ते दास्यन्तीति तदेभ्योऽब्रवीत् ते सुवर्गं ँलोकं ँयन्तो य एषां पशव आसन् तानस्मा अददुस्तं पशुभिश्चरन्तं ँयज्ञवास्तौ रुद्र आऽगच्छथ् सोऽब्रवीन्मम वा इमे पशव इत्यदुर्वै – [ ] **30**

**TS 3.1.9.5 (Padam)**

सुवर्गमिति सुवः – गम् । लोकम् । न । प्रेति । जानन्ति । तेभ्यः । इदम् । ब्राह्मणम् । ब्रूहि । ते । सुवर्गमिति सुवः – गम् । लोकम् ।

यन्तः । ये । एषाम् । पशवः । तान् । ते । दास्यन्ति । इति । तत् ।

एभ्यः । अब्रवीत् । ते । सुवर्गमिति सुवः – गम् । लोकम् । यन्तः ।

ये । एषाम् । पशवः । आसन्न् । तान् । अस्मै । अददुः । तम् ।

पशुभिरिति पशु –भिः । चरन्तम् । यज्ञवास्ताविति यज्ञ–वास्तौ ।

रुद्रः । एति । अगच्छत् । सः । अब्रवीत् । मम । वै । इमे ।

पशवः । इति । अदुः । वै । **30 (50)**

**TS 3.1.9.6**

मह्यमिमानित्यब्रवीन्न वै तस्य त ईशत इत्यब्रवीद्–यद्–यज्ञवास्तौ

हीयते मम वै तदिति तस्माद्–यज्ञवास्तु नाभ्यवेत्य॑ सोऽब्रवीद्–

यज्ञे मा ऽऽ भजाथ ते पशून् नाऽभि म॑स्य इति तस्मा एतं मन्थिनः

स॑स्रावमजुहोत् ततो वै तस्य रुद्रः पशून् नाभ्यमन्यत यत्रैत ( )

मेवं ँविद्वान् मन्थिनः स॑ स्रावं जुहोति न तत्र रुद्रः

पशूनभि मन्यते ॥ **31**

**TS 3.1.9.6 (Padam)**

मह्यम् । इमान् । इति । अब्रवीत् । न । वै । तस्य । ते । ईशते ।

इति । अब्रवीत् । यत् । यज्ञवास्ताविति यज्ञ–वास्तौ । हीयते ।

मम । वै । तत् । इति । तस्मात् । यज्ञवास्त्विति यज्ञ – वास्तु । न ।

अभ्यवेत्यमित्यभि – अवेत्यम् । सः । अब्रवीत् । यज्ञे । मा । एति ।

भज । अथ । ते । पशून् । न । अभीति । मꣳस्ये । इति । तस्मै ।

एतम् । मन्थिनः । सꣳस्रावमिति सं – स्रावम् । अजुहोत् । ततः ।

वै । तस्य । रुद्रः । पशून् । न । अभीति । अमन्यत । यत्र ।

एतम् ( ) । एवम् । विद्वान् । मन्थिनः । सꣳस्रावमिति

सं – स्रावम् । जुहोति । न । तत्र । रुद्रः । पशून् ।

अभीति । मन्यते ॥ **31 (61)**

***(दधात्वा – यतनवतीर्या – उपजीवनीयो भवति – तेऽ – दुर्वै – यत्रैत – मेकादश च) (A9)***

**TS 3.1.10.1**

जुष्टो वाचो भूयासं जुष्टो वाचस्पतये देवि वाक् ।

यद्वाचो मधुमत् तस्मिन् मा धाः स्वाहा सरस्वत्यै ॥

ऋचा स्तोमꣳ समर्द्धय गायत्रेण रथंतरं ।

बृहद्–गायत्रवर्तनि ॥

यस्ते द्रप्सः स्कन्दति यस्ते अ॒ꣳशुर्बाहुच्युतो धिषणयोरुपस्थात् ।
अद्ध्वर्योर्वा परि यस्ते पवित्राथ् स्वाहाकृतमिन्द्राय तं जुहोमि ॥
यो द्रप्सो अ॒ꣳशुः पतितः पृथिव्यां परिवापात् – [ ] **32**

**TS 3.1.10.1 (Padam)**

जुष्टः । वाचः । भूयासम् । जुष्टः । वाचः । पतये । देवि । वाक् ॥
यत् । वाचः । मधुमदिति मधु–मत् । तस्मिन्न् । मा । धाः । स्वाहा ।
सरस्वत्यै ॥ ऋचा । स्तोमम् । समिति । अर्द्धय । गायत्रेण ।
रथन्तरमिति रथं–तरम् ॥ बृहत् । गायत्रवर्तनीति गायत्र–वर्तनि ॥
यः । ते । द्रप्सः । स्कन्दति । यः । ते । अ॒ꣳशुः । बाहुच्युत इति
बाहु – च्युतः । धिषणयोः । उपस्थादित्युप – स्थात् ॥ अद्ध्वर्योः ।
वा । परीति । यः । ते । पवित्रात् । स्वाहाकृतमिति स्वाहा–कृतम् ।
इन्द्राय । तम् । जुहोमि ॥ यः । द्रप्सः । अ॒ꣳशुः । पतितः ।
पृथिव्याम् । परिवापादिति परि – वापात् । **32 (50)**

**TS 3.1.10.2**

पुरोडाशात् करम्भात् ।
धानासोमान्मन्थिन इन्द्र शुक्राथ् स्वाहाकृतमिन्द्राय तं जुहोमि ॥

यस्ते द्रप्सो मधुमाँ इन्द्रियावान्थ् स्वाहाकृतः पुनरप्येति देवान् ।
दिवः पृथिव्याः पर्यन्तरिक्षाथ् स्वाहा कृतमिन्द्राय तं जुहोमि ॥
अद्ध्वर्युर्वा ऋत्विजां प्रथमो युज्यते तेन स्तोमो योक्तव्य
इत्याहुर्वागग्रेगा अग्र एत्वृजुगा देवेभ्यो यशो मयि दधती प्राणान्
पशुषु प्रजां मयि– [ ] **33**

**TS 3.1.10.2 (Padam)**

पुरोडाशात् । करम्भात् ॥ धानासोमादिति धाना–सोमात् । मन्थिनः ।
इन्द्र । शुक्रात् । स्वाहाकृतमिति स्वाहा – कृतम् । इन्द्राय । तम् ।
जुहोमि ॥ यः । ते । द्रप्सः । मधुमानिति मधु – मान् ।
इन्द्रियावानितीन्द्रिय – वान् । स्वाहाकृत इति स्वाहा–कृतः । पुनः ।
अप्येतीत्यपि – एति । देवान् ॥ दिवः । पृथिव्याः । परीति ।
अन्तरिक्षात् । स्वाहाकृतमिति स्वाहा – कृतम् । इन्द्राय ।
तम् । जुहोमि ॥ अद्ध्वर्युः । वै । ऋत्विजाम् । प्रथमः । युज्यते ।
तेन । स्तोमः । योक्तव्यः । इति । आहुः । वाक् । अग्रेगा
इत्यग्रे – गाः । अग्रे । एतु । ऋजुगा इत्यृजु – गाः । देवेभ्यः ।

यशः । मयि । दधती । प्राणानिति प्र – अनान् । पशुषु ।
प्रजामिति प्र – जाम् । मयि । **33 (50)**

**TS 3.1.10.3**

च यजमाने चेत्याह वाचमेव तद्यज्ञमुखे युनक्ति वास्तु वा एतद्यज्ञस्य क्रियते यद्–ग्रहान् गृहीत्वा बहिष्पवमानꣳ सर्पन्ति पराञ्चो हि यन्ति पराचीभिः स्तुवते वैष्णव्यर्चा पुनरेत्योप तिष्ठते यज्ञो वै विष्णुर्यज्ञमेवाकर्विष्णो त्वन्नो अन्तमः शर्म यच्छ सहन्त्य । प्र ते धारा मधुश्चुत उथ्सं दुह्रते ( ) अक्षितमित्याह यदेवास्य शयानस्योपशुष्यति तदेवास्यैतेनाऽऽ* प्याययति ॥ **34**

**TS 3.1.10.3 (Padam)**

च । यजमाने । च । इति । आह । वाचम् । एव । तत् । यज्ञमुख इति यज्ञ – मुखे । युनक्ति । वास्तु । वै । एतत् । यज्ञस्य । क्रियते । यत् । ग्रहान् । गृहीत्वा । बहिष्पवमानमिति बहिः – पवमानम् । सर्पन्ति । पराञ्चः । हि । यन्ति । पराचीभिः । स्तुवते । वैष्णव्या । ऋचा । पुनः । एत्येत्या – इत्य । उपेति । तिष्ठते । यज्ञः । वै । विष्णुः । यज्ञम् । एव । अकः । विष्णो इति । त्वम् । नः ।

अन्तमः । शर्म । यच्छ । सहन्त्य ॥ प्रेति । ते । धाराः ।

मधुश्चुत इति मधु–श्चुतः । उथ्सम् । दुह्रते ( ) । अक्षितम् । इति ।

आह । यत् । एव । अस्य । शयानस्य । उपशुष्यतीत्युप – शुष्यति ।

तत् । एव । अस्य । एतेन । एति । प्यायति ॥ **34 (64)**

*(परिवापात् – प्रजां मयि – दुह्रते – चतुर्दश च) (A10)*

**TS 3.1.11.1**

अग्निना रयिमश्ञवत् पोषमेव दिवेदिवे ।

यशसं ँवीरवत्तमं ॥

गोमा ँ अग्नेऽविमा ँ अश्वी यज्ञो नृवथ्सखा सदमिदप्रमृष्यः ।

इडावा ँ एषो असुर प्रजावान् दीर्घो रयिः पृथुबुद्ध्नः सभावान् ॥

आ प्यायस्व सन्ते ॥

इह त्वष्टारमग्रियं ँविश्वरूपमुप ह्वये ।

अस्माकमस्तु केवलः ॥

न्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व ।

यतो वीरः – [ ] **35**

**TS 3.1.11.1 (Padam)**

अग्निना । रयिम् । अश्ञवत् । पोषम् । एव । दिवेदिव इति

दिवे – दिवे ॥ यशसम् । वीरवत्तममिति वीरवत् – तमम् ॥

गोमानिति गो – मान् । अग्ने । अविमानित्यवि – मान् । अश्वी ।

यज्ञः । नृवथ्सखेति नृवत् – सखा । सदम् । इत् ।

अप्रमृष्य इत्यप्र – मृष्यः ॥ इडावानितीडा – वान् । एषः ।

असुर । प्रजावानिति प्रजा – वान् । दीर्घः । रयिः । पृथुबुद्ध्न इति

पृथु – बुद्ध्नः । सभावानिति सभा – वान् ॥ एति । प्यायस्व ।

समिति । ते ॥ इह । त्वष्टारम् । अग्रियम् । विश्वरूपमिति

विश्व – रूपम् । उपेति । ह्वये ॥ अस्माकम् । अस्तु । केवलः ॥

तत् । नः । तुरीपम् । अध । पोषयिलु । देव । त्वष्टः । वीति ।

रराणः । स्यस्व ॥ यतः । वीरः । **35 (50)**

**TS 3.1.11.2**

कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥

शिवस्त्वष्टरिहाऽऽ* गहि विभुः पोष उत त्मना ।

यज्ञेयज्ञे न उदव ॥

पिशङ्गरूपः सुभरो वयोधाः श्रुष्टी वीरो जायते देवकामः ।

प्रजां त्वष्टा वि ष्यतु नाभिमस्मे **अथा** देवानामप्येतु पाथः ॥

प्र णो देव्या नो दिवः ॥

पीपिवाꣳसꣳ सरस्वतः स्तनं ँयो विश्वदर्.शतः ।

धुक्षीमहि प्रजामिषं ॥ **36**

**TS 3.1.11.2 (Padam)**

कर्मण्यः । सुदक्ष इति सु – दक्षः । युक्तग्रावेति युक्त – ग्रावा ।

जायते । देवकाम इति देव – कामः ॥ शिवः । त्वष्टः । इह । एति ।

गहि । विभुरिति वि – भुः । पोषे । उत । त्मना ॥ यज्ञे यज्ञ इति

यज्ञे – यज्ञे । नः । उदिति । अव ॥ पिशङ्गरूप इति पिशङ्ग–रूपः ।

सुभर इति सु – भरः । वयोधा इति वयः – धाः । श्रुष्टी । वीरः ।

जायते । देवकाम इति देव – कामः ॥ प्रजामिति प्र – जाम् ।

त्वष्टा । वीति । स्यतु । नाभिम् । अस्मे इति । अथ । देवानाम् ।

अपीति । एतु । पाथः ॥ प्रेति । नः । देवी । एति । नः । दिवः ॥

पीपिवाꣳसम् । सरस्वतः । स्तनम् । यः ।

विश्वदर्.शत इति विश्व – दर्.शतः ॥ धुक्षीमहि ।

प्रजामिति प्र – जाम् । इषम् ॥ **36 (50)**

**TS 3.1.11.3**

ये ते सरस्व ऊर्मयो मधुमन्तो घृतश्चुतः ।

तेषां ते सुम्नमीमहे ॥

यस्य व्रतं पशवो यन्ति सर्वे यस्य व्रतमुपतिष्ठन्त आपः ।

यस्य व्रते पुष्टिपतिर्निविष्टस्तꣳ सरस्वन्तमवसे हुवेम ॥

दिव्यꣳ सुपर्णं वँयसं बृहन्तमपां गर्भं वृँषभमोषधीनां ।

अभीपतो वृष्ट्या तर्पयन्तं तꣳ सरस्वन्तमवसे हुवेम ॥

सिनीवालि पृथुष्टुके या देवानामसि स्वसा ।

जुषस्व हव्य – [ ] **37**

**TS 3.1.11.3 (Padam)**

ये । ते । सरस्वः । ऊर्मयः । मधुमन्त इति मधु – मन्तः ।

घृतश्चुत इति घृत – श्चुतः ॥ तेषाम् । ते । सुम्नम् । ईमहे ॥ यस्य ।

व्रतम् । पशवः । यन्ति । सर्वे । यस्य । व्रतम् । उपतिष्ठन्त

इत्युप –तिष्ठन्ते । आपः ॥ यस्य । व्रते । पुष्टिपतिरिति पुष्टि–पतिः ।

निविष्ट इति नि – विष्टः । तम् । सरस्वन्तम् । अवसे । हुवेम ॥

दिव्यम् । सुपर्णमिति सु – पर्णम् । वयसम् । बृहन्तम् । अपाम् ।

गर्भम् । वृषभम् । ओषधीनाम् ॥ अभीपतः । वृष्ट्या । तर्पयन्तम् ।

तम् । सरस्वन्तम् । अवसे । हुवेम ॥ सिनीवालि ।

पृथुष्टुक इति पृथु – स्तुके । या । देवानाम् । असि । स्वसा ॥

जुषस्व । हव्यम् । **37 (50)**

**TS 3.1.11.4**

माहुतं प्रजां देवि दिदिड्ढि नः ॥

या सुपाणिः स्वङ्गुरिः सुषूमा बहुसूवरी ।

तस्यै विश्पत्नियै हविः सिनीवाल्यै जुहोतन ॥

इन्द्रं ँवो विश्वतस्परी न्द्रं नरः ॥

असितवर्णा हरयः सुपर्णा मिहो वसाना दिवमुत् पतन्ति ॥

त आ ऽववृत्रन्थ् सदनानि कृत्वाऽऽदित् पृथिवी घृतैर्व्युद्यते ॥

हिरण्यकेशो रजसो विसारे ऽहिर्द्धुनिर्वात इव ध्रजीमान् ।

शुचिभ्राजा उषसो – [ ] **38**

**TS 3.1.11.4 (Padam)**

आहुतमित्या – हुतम् । प्रजामिति प्र–जाम् । देवि । दिदिड्ढि । नः ॥

या । सुपाणिरिति सु – पाणिः । स्वङ्गुरिरिति सु – अङ्गुरिः ।

सुषूमेति सु – सूमा । बहुसूवरीति बहु – सूवरी ॥ तस्यै ।

विश्पत्नियै । हविः । सिनीवाल्यै । जुहोतन ॥ इन्द्रम् । वः ।

विश्वतः । परीति । इन्द्रम् । नरः ॥ असितवर्णा इत्यसित – वर्णाः ।

हरयः । सुपर्णा इति सु – पर्णाः । मिहः । वसानाः । दिवम् ।

उदिति । पतन्ति ॥ ते । एति । अववृत्रन्न् । सदनानि । कृत्वा ।

आत् । इत् । पृथिवी । घृतैः । वीति । उद्यते ॥

हिरण्यकेश इति हिरण्य – केशः । रजसः ।

विसार इति वि – सारे । अहिः । धुनिः । वातः । इव । ध्रजीमान् ॥

शुचिभ्राजा इति शुचि – भ्राजाः । उषसः । **38 (50)**

**TS 3.1.11.5**

नवेदा यशस्वतीरपस्युवो न सत्याः ॥

आ ते सुपर्णा अमिनन्त एवैः कृष्णो नोनाव वृषभो यदीदं ।

शिवाभिर्न स्मयमानाभिराऽगात् पतन्ति मिहः स्तनयन्त्यभ्रा ॥

वाश्रेव विद्युन्मिमाति वथ्सं न माता सिषक्ति ।

यदेषां वृँष्टिरसर्जि ॥

पर्वतश्चिन्महि वृद्धो बिभाय दिवश्चिथ् सानु रेजत स्वने वः ।

यत् क्रीडथ मरुत – [ ] **39**

**TS 3.1.11.5 (Padam)**

नवेदाः । यशस्वतीः । अपस्युवः । न । सत्याः ॥ एति । ते ।

सुपर्णा इति सु – पर्णाः । अमिनन्त । एवैः । कृष्णः । नोनाव ।

वृषभः । यदि । इदम् ॥ शिवाभिः । न । स्मयमानाभिः । एति ।

अगात् । पतन्ति । मिहः । स्तनयन्ति । अभ्रा ॥ वाश्रा । इव ।

विद्युदिति वि–द्युत् । मिमाति । वथ्सम् । न । माता । सिषक्ति ॥

यत् । एषाम् । वृष्टिः । असर्जि ॥ पर्वतः । चित् । महि । वृद्धः ।

बिभाय । दिवः । चित् । सानु । रेजत । स्वने । वः ॥

यत् । क्रीडथ । मरुतः । **39 (50)**

**TS 3.1.11.6**

ऋष्टिमन्त आप इव सद्रिध्रयञ्चो धवद्ध्वे ॥

अभि क्रन्द स्तनय गर्भमा धा उदन्वता परि दीया रथेन ।

दृतिꣳ सु कर्.ष विषितं न्यञ्चꣳ समा भवन्तूद्वता निपादाः ॥

त्वं त्या चिदच्युताऽग्ने पशुर्न यवसे ।

**धामा** ह यत् ते अजर वना वृश्चन्ति शिक्वसः ॥

अग्ने भूरीणि तव जातवेदो देव स्वधावोऽमृतस्य धाम ।

याश्च – [ ] **40**

**TS 3.1.11.6 (Padam)**

ऋष्टिमन्त इत्यृष्टि–मन्तः । आपः । इव । सद्ध्रियञ्चः । धवद्ध्वे ॥

अभीति । क्रन्द । स्तनय । गर्भम् । एति । धाः ।

उदन्वतेत्युदन् – वता । परीति । दीय । रथेन ॥ दृतिम् । स्विति ।

कर्.ष । विषितमिति वि – सितम् । न्यञ्चम् । समाः । भवन्तु ।

उद्वतेत्युत् – वता । निपादा इति नि – पादाः ॥ त्वम् । त्या ।

चित् । अच्युता । अग्ने । पशुः । न । यवसे ॥ धाम । ह । यत् ।

ते । अजर । वना । वृश्चन्ति । शिक्वसः ॥ अग्ने । भूरीणि । तव ।

जातवेद इति जात – वेदः । देव । स्वधाव इति स्वधा – वः ।

अमृतस्य । धाम ॥ याः । च । **40 (50)**

**TS 3.1.11.7**

माया मायिनां ँविश्वमिन्व त्वे पूर्वीः सन्दधुः पृष्टबन्धो ॥

दिवो नो वृष्टिं मरुतो ररीद्ध्वं प्र पिन्वत वृष्णो अश्वस्य धाराः ।

अर्वाङेतेन स्तनयित्नुनेह्यपो निषिञ्चन्नसुरः पिता नः ॥

पिन्वन्त्यपो मरुतः सुदानवः पयो घृतवद्विदथेष्वाभुवः ।

अत्यं न मिहे वि नयन्ति वाजिनमुथ्सं दुहन्ति स्तनयन्तमक्षितं ॥

उदप्रुतो मरुतस्ताꣳ इयर्त वृष्टिं – [ ] **41**

**TS 3.1.11.7 (Padam)**

मायाः । मायिनाम् । विश्वमिन्वेति विश्वम्–इन्व । त्वे इति । पूर्वीः ।

सन्दधुरिति सं – दधुः । पृष्टबन्धो इति पृष्ट – बन्धो ॥

दिवः । नः । वृष्टिम् । मरुतः । ररीद्ध्वम् । प्रेति । पिन्वत ।

वृष्णः । अश्वस्य । धाराः ॥ अर्वाङ् । एतेन । स्तनयित्नुना । एति ।

इहि । अपः । निषिञ्चन्निति नि –सिञ्चन् । असुरः । पिता । नः ॥

पिन्वन्ति । अपः । मरुतः । सुदानव इति सु – दानवः । पयः ।

घृतवदिति घृत – वत् । विदथेषु । आभुव इत्या – भुवः ॥ अत्यम् ।

न । मिहे । वीति । नयन्ति । वाजिनम् । उथ्सम् । दुहन्ति ।

स्तनयन्तम् । अक्षितम् ॥ उदप्रुत इत्युद – प्रुतः ।

मरुतः । तान् । इयर्त । वृष्टिम् । **41 (50)**

**TS 3.1.11.8**

येँ विश्वे मरुतो जुनन्ति ।

क्रोशाति गर्दा कन्येव तुन्ना पेरुं तुञ्जाना पत्येव जाया ॥

घृतेन द्यावापृथिवी मधुना समुक्षत पयस्वतीः कृणुताऽऽप ओषधीः ।

ऊर्जं च तत्र सुमतिं च पिन्वथ यत्रा नरो मरुतः सिञ्चथा मधु ॥

उदुत्यं चित्रं ॥

और्वभृगुवच्छुचि–मप्नवानवदा हुवे ।

अग्निꣳ समुद्रवाससं ॥

आ सवꣳ सवितुर्यथा भगस्ये ( ) व भुजिꣳ हुवे ।

अग्निꣳ समुद्रवाससं ॥

हुवे वातस्वनं कविं पर्जन्यक्रन्द्यꣳ सहः ।

अग्निꣳ समुद्रवाससं ॥ **42**

**TS 3.1.11.8 (Padam)**

ये । विश्वे । मरुतः । जुनन्ति ॥ क्रोशाति । गर्दा । कन्या । इव ।

तुन्ना । पेरुम् । तुञ्जाना । पत्या । इव । जाया ॥ घृतेन ।

द्यावापृथिवी इति द्यावा – पृथिवी । मधुना । समिति । उक्षत ।

पयस्वतीः । कृणुत । आपः । ओषधीः ॥ ऊर्जम् । च । तत्र ।

सुमतिमिति सु – मतिम् । च । पिन्वथ । यत्र । नरः । मरुतः ।

सिञ्चथ । मधु ॥ उदिति । उ । त्यम् । चित्रम् ॥

और्वभृगुवदित्यौर्वभृगु – वत् । शुचिम् ।

अप्नवानवदित्यप्नवान – वत् । एति । हुवे ॥ अग्निम् ।

समुद्रवाससमिति समुद्र – वाससम् ॥ एति । सवम् । सवितुः ।

यथा । भगस्य ( ) । इव । भुजिम् । हुवे ॥

अग्निम् । समुद्रवाससमिति समुद्र – वाससम् ॥

हुवे । वातस्वनमिति वात – स्वनम् । कविम् ।

पर्जन्यक्रन्द्यमिति पर्जन्य – क्रन्द्यम् । सहः ॥

अ॒ग्निम् । स॒मु॒द्रवा॑सस॒मि॑ति स॒मु॒द्र – वा॒स॒स॒म् ॥ **42 (62)**

(वी॒र – इष॑ꣳ – ह॒व्य – मु॒षसो॑ – मरुत – श्च॒ – वृष्टिं॒ – भग॑स्य॒ – द्वा॑दश च) *(A11)*

==========================

**Prasna Korvai with starting Padams of 1 to 11 Anuvaakams :-**

(प्रजापतिरकामयतै – ष ते गायत्रो – यज्ञं वै – प्रजापतेर्जायमानाः – प्राजापत्या – यो वा अयथादेवत – मिष्टर्गो – निग्राभ्याः स्थ – यो वै देवा – ञ्जुष्टो – ऽग्निना रयि – मेकादश )

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(प्रजापतिरकामयत – प्रजापतेर्जायमाना – व्यायच्छन्ते – मह्यमिमा – न्माया मायिनान् – द्विचत्वारि॑ꣳशत्)

**First and Last Padam of First Prasnam of Kandam 3:-**

(प्रजापतिरकामयता –ऽग्नि॑ꣳ समुद्रवाससं )

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां तृतीयकाण्डे पद पाठे प्रथमः प्रश्नः समाप्तः ॥

**Details of Panchati and Padam for Kandam 3 , Prasanam 1 – (TS 3.1)**

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 4 | 224 |
| Anuvakam 2 | 4 | 219 |
| Anuvakam 3 | 2 | 126 |
| Anuvakam 4 | 4 | 216 |
| Anuvakam 5 | 2 | 105 |
| Anuvakam 6 | 3 | 133 |
| Anuvakam 7 | 3 | 178 |
| Anuvakam 8 | 3 | 160 |
| Anuvakam 9 | 6 | 311 |
| Anuvakam 10 | 3 | 164 |
| Anuvakam 11 | 8 | 412 |
| Total → | 42 | 2248 |

**Notes:**

- **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
- **Please download our vedic compilations from our web site "www.vedavms.in"**